८२ इत्यण् ।) स्वर्णम् । (यथा, माघे १ । २० ।
"स तप्तकार्त्तस्वरभास्वराम्बरः" ॥)
धुस्तूरः । इत्यमरः । २ । ४ । ७७ ॥

कार्त्तान्तिकः, पुं, (कृतान्तं वेत्ति । "क्रतूक्थादिसूत्रान्ताट्ठक्" । ४ । २ । ६० । इति ठक् ।) ज्योतिर्व्विद् । दैवज्ञः । इत्यमरः । २ । ८ । १४ ॥

कार्त्तिकः, पुं, (कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे इति पाक्षिको ऽण् ।) वैशाखादिद्वादशमासान्तर्गतसप्तममासः । कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । अयं तुलास्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपमुख्यचान्द्रः । सौरस्तु तुलाराशिस्थरविककालः । इति स्मृतिः ॥ तत्पर्य्यायः । बाहुलः २ ऊर्ज्जः ३ कार्त्तिकिकः ४ । इत्यमरः । १ । ४ । १७ ॥ कौमुदः ५ । इति शब्दरत्नावली ॥ * ॥

अथ कार्त्तिककृत्यम् ।

पद्मपुराणे ।

"तुलामकरमेषेषु प्रातःस्नानं विधीयते" ।
तत्र संकल्पः अरुणोदयकाले मज्जनं कृत्वाचम्य ॐ तत्सदद्य कार्त्तिके मासि अमुकपक्षे अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रः श्री अमुकदेवशर्म्मा श्रीविष्णुप्रीतिकामः प्रातःस्नानमहं करिष्ये इति संकल्प्य यथोक्तविधिना इतिकर्त्तव्यतां विधाय—
"ॐकार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्द्दन ! ।
प्रीत्यर्थं तव देवेश ! दामोदर ! मया सह" ।
इति स्नायात् । मया लक्ष्म्या । प्रतिदिनसंकल्पे तु आरभ्य तुलास्थरविं यावत् प्रत्यहं इति न वक्तव्यम् । किन्तु मासीत्यनन्तरं तुलास्थरवावित्यधिकं वक्तव्यम् । चान्द्रस्नानवाक्यन्तु वैशाखकृत्ये अनुसन्धेयम् । तथा वायुपुराणे ।
"यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
कार्त्तिकं सकलं व्याप्य प्रातःस्नायी भवेन्नरः" ॥ * ॥

तथा च गारुडे ।

"गवामयुतदानेन यत् फलं लभते खग ! ।
तुलसीपत्रकैकेन तत् फलं कार्त्तिके स्मृतम्" ॥
ॐअद्येत्यादि तुलसीपत्रकैकसमसंख्यायुतधेनुदानजन्यफलसमफलप्राप्तिकामः एतानि तुलसीपत्राणि श्रीविष्णवेऽहं ददे । इत्यभिलप्य एतानि तुलसीपत्राणि श्रीविष्णवे नमः । इत्यनेन दद्यात् ॥ * ॥

ब्रह्माण्डपुराणे ।

"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः ॥
ॐदामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥

लोलया लक्ष्म्या ।

"इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चाक्षयफलं लभेत्" ॥
स्नानवत् । ॐअद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा अक्षयदीपदानफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा आकाशे मण्डपे वापि श्रीविष्णवे दीपदानमहं करिष्ये । इति संकल्प्य दामोदरायेत्यादिना दद्यात् । द्वितीयादिदिने ॐदामोदरायेत्यनेनेति विशेषः । विष्णुगृहे तु । ॐअद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्माग्निष्टोमसहस्रजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीविष्णुवेश्मनि श्रीविष्णवे दीपदानमहं करिष्ये । इति संकल्प्य ॐ दामोदरायेत्यादिना दद्यात् । द्वितीयादिदिने ॐ दामोदरायेत्यनेनेति विशेषः ॥ * ॥

हविष्यान्नादौ तु ब्रह्मपुराणे ।

"व्रतोपवासनियमैः कार्त्तिको यस्य गच्छति ।
देवो वैमानिको भूत्वा स याति परमं पदम्" ॥
तत्र अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा वैमानिकदेवत्वभवनपूर्ब्बकपरमपदप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा हविष्येतरभोजननिवृत्तिमहं करिष्ये । इत्यादिवाक्ये विशेषः । एवं फलाहारादावपि ॥ * ॥ हविष्यद्रव्याणि च ।
"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
तिन्तिड़ी जीरकञ्चैव नागरङ्गञ्च पिप्पली ॥
कदली लवली धात्री फलान्यगुड़मैक्षवम् ।
अतैलपक्वं मुनयो हविष्यान्नं विदुर्ब्बुधाः" ॥
हैमन्तिकमित्यभिधायागस्त्यसंहितायाम् ।
"नारिकेलफलञ्चैव कदलीं लवलीन्तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकीम् ॥
व्रतान्तरप्रशस्तञ्च हविष्यं मन्यते बुधाः" ।
अत्र च आरब्धव्रतोपवासादौ फलजलादिभक्षणमप्याहतुरुद्योगपर्व्वबौधायनौ ।
"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम्" ॥ * ॥
फलाहारादावपि तुलसीरहिते दोषमाह ।
"तुलसीं विना या क्रियते न पूजा
स्नानं न तद्यत् तुलसीं विना कृतम् ।
भुक्तं न तद्यत् तुलसीविवर्ज्जितं
पीतं न तद्यत्तुलसीविवर्ज्जितम्" ॥ * ॥

नारदीये ।

"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि ।
चण्डालो जायते राजन् कार्त्तिके मांसभक्षणात्" ॥

तथा च महाभारते ।

"कौमुदन्तु विशेषेण शुक्लपक्षे नराधिप ! ।
वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते" ॥
कौमुदं कार्त्तिकम् । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।
"एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं शीतलासु नदीषु च ।
वर्ज्जितव्या तथा हिंसा मांसभोजनमेव च" ॥
ततश्च मांसभोजननिषेधे कार्त्तिकमासतत्शुक्लपक्षतदेकादश्यादिपञ्चदिनानि शक्ताशक्तभेदात् पापतारतम्याद्वा निषिद्धानि ।
"कार्त्तिके शौकरं मांसं यस्तु भुञ्जीत दुर्म्मतिः ।
षष्टिवर्षसहस्राणि रौरवे परिपच्यते" ॥ कोलपटोलकदम्बवृन्ताककांस्यसन्धितानि वर्ज्जयेत् ।
"पटोलानि कदम्बानि वृन्ताकसहितानि च ।
भुञ्जानः कार्त्तिके मासि यावदाहूतनारकी" ॥ * ॥
भूतचतुर्द्दशीकृत्यं तत्शब्दे द्रष्टव्यम् । तत्र दीपदाने विशेषो यथा,—
"ततः प्रदोषसमये दीपान्दद्यात् प्रयत्नतः ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ।
कूटागारेषु चैत्येषु गुहासु च नदीषु च" ॥

दीपदानमन्त्रः ।

"ॐ नमः पितृभ्यः प्रेतेभ्यो नमो धर्म्माय विष्णवे ।
नमो धर्म्माय रुद्राय कान्तारपतये नमः" ॥ * ॥
दीपान्विताकृत्यं तत्शब्दे द्रष्टव्यम् । तत्र विशेषो यथा । तत्र बालातुरव्यतिरेकेण दिवा न भोक्तव्यम् । तत्र पार्व्वणश्राद्धं कृत्वा प्रदोषे प्राचीनावीती दक्षिणामुखो ज्वलदुल्काम् ।
"ॐ शस्त्राशस्त्रहतानाञ्च भूतानां भूतदर्शयोः ।
उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना" ॥
इत्यनेन गृह्णीयात् ।
"ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम्" ॥
इत्यनेन भूमौ स्थापयेत् ।
"ॐ यमलोकं परित्यज्य आगता ये महालये ।
उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते" ॥
इत्यनेन पितॄन् विसर्ज्जयेत् । यद्येवं पूर्व्वदिन एव प्रदोषव्याप्तिन्यमावास्या तदा पूर्व्वदिन एव श्राद्धमकृत्वापि उल्कादानं कर्त्तव्यम् । आचारात् परभूतोपाख्यानञ्च श्रोतव्यम् । उभयतः प्रदोषव्याप्तौ परदिन एव युग्मात् । उभयतः प्रदोषाप्राप्तावपि उल्कादानं परदिने पार्व्वणानुरोधात् । अत्रैव पूर्व्वदिने लक्ष्मी रात्रौ पूज्या ।
"अमावस्या यदा रात्रौ दिवाभागे चतुर्द्दशी ।
पूजनीया तदा लक्ष्मीर्व्विज्ञेया सुखरात्रिका" ॥
इति वचनात् । लक्ष्मीपूजाविषयेऽप्येवं व्यवस्था । ततो गृहमध्ये उत्तराभिमुखो लक्ष्मीं पूजयेत् । ततः स्वस्तिवाचनपूर्व्वकं ॐ सूर्य्यः सोम इति ॐ तद्विष्णोरिति च पठित्वा तिलपुष्पजलान्यादाय ॐ तत्सदित्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा परमविभूतिकामको लक्ष्मीपूजनमहं करिष्ये । इति संकल्प्य शालग्रामे घटादिस्थजले वा भूतशुद्ध्यादिकं कृत्वा लक्ष्मीं पूजयेत् । तद्यथा । ॐ पाशाक्षमालिकाम्भोज इत्यादिना ध्यात्वा । ॐ भूर्भुवःस्वर्म्महालक्ष्मि ! इहागच्छ इत्याद्यावाह्य एतत्पाद्यं ॐ लक्ष्म्यै नमः । एवमर्घ्याचमनीयगन्धपुष्पधूपदीपनैवेद्यपुनराचमनीयताम्बूलादि प्रत्येकं दद्यात् ।
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ! ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्" ॥
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ।